# आयुर्वेदे ज्योतिषशास्त्रीयाणां शब्दावलीनां प्रयोगः
## (आयुर्वेदस्य बृहत्त्रयीसन्दर्भे)

**डॉ.उमाकान्ततिवारी**

वरिष्ठशोधाध्येता, सं.सं.प्र.

## सारांशः

*आयुर्वेदे 'कालगणना, दिनम्, रात्रिः, अहोरात्रः, पक्षः, मासः, तिथिः, मुहूर्तः, ऋतुः, अयनम्, सौरवर्षः, ग्रहः, नक्षत्रम्, पातः, ग्रहणम्' इत्यादयः ज्योतिषीयविषयाः अपि यथावश्यकतया प्रयुक्ताः सन्ति । अतः आयुर्वेदस्य विद्यार्थिनां कृते तेषां विषयाणां सम्यक् ज्ञानम् अपेक्षितं भवति । तेषाम् अपेक्षितानां ज्योतिषीयविषयाणां ज्ञानेन विना अभीष्टस्य अर्थस्य अवबोधः भवितुं न अर्हति । उदाहरणार्थं यत्र दिनार्थकानां शब्दानां प्रयोगः कृतः तत्र सूर्योदयात् सूर्यास्तपर्यन्तः कालः अभीष्टः, परन्तु यत्र दिनार्थकः शब्दः द्विगुसमासयुक्तः अथवा रात्र्यर्थकेन शब्देन सह समस्तः भवति तत्र ज्योतिषशास्त्रीयं* ***सावनदिनम् (सूर्योदयात् अग्रिमसूर्योदयपर्यन्तम् एकं सावनदिनम्)*** *अभीष्टं भवति । एवमेव यत्र मुहूर्तशब्दः योग्य-प्रशस्त-शुभादिभिः विशेषणपदैः विना उक्तः तत्र घटिकाद्वयात्मकः कालः एव अभीष्टः, यत्र मुहूर्तस्य नाम निर्दिष्टं यथा ब्राह्ममुहूर्तः नैर्ऋतमुहूर्तः इत्यादि, तत्र तत्संज्ञकः घटिकाद्वयात्मकः मुहूर्तः अभीष्टः भवति, परन्तु यत्र शुभस्य अथवा प्रशस्तस्य मुहूर्तस्य विषये निर्देशः दत्तः, तत्र तु ज्योतिषीया पञ्चाङ्गशुद्धिः अभीष्टा भवति । एवमेव अन्येषां ज्योतिषशास्त्रीयशब्दानां विषये अपि ज्ञातव्यम् । अतः आयुर्वेदे 'कुत्र कः ज्योतिषीयः विषयः अभीष्टः' इति अभिज्ञानपूर्वकम् आयुर्वेदस्य बृहत्त्रय्यां (चरकसंहिता-सुश्रुतसंहिता-अष्टाङ्गहृदयेषु) प्रयुक्तानां ज्योतिषशास्त्रीयशब्दावलीनां सङ्कलनं, तासां शब्दावलीनां ज्योतिषशास्त्रदृष्ट्या विवेचनं च क्रियते । एतद् विवेचनम् आयुर्वेदाध्येतृणां कृते उपयोगि भविष्यति इति ।*

## प्रस्तावना

वैदिकविषयाणां सरलतया अवगमनार्थम् अस्य लौकिकोपयोगितासिद्धये च उपवेदानां वेदाङ्गानां च रचना कृता । वेदतत्त्वानां लौकिकोपयोगितादृष्ट्या उपवेदानां रचना जाता, तथैव वेदोक्त-विषयाणाम् अवगमनार्थं वेदाङ्गानां विभाजनं कृतम् । अतः यथा वेदाङ्गानि वेदस्य अर्थबोधने सहायकानि भवन्ति, तथैव उपवेदानाम् अर्थावगमने अपि वेदाङ्गानि सहायकानि भवन्ति एव ।

शिक्षा कल्पः निरुक्तं व्याकरणं छन्दः ज्योतिषम् इति एतानि षड् वेदाङ्गानि भवन्ति । एतेषां ज्योतिषशास्त्ररूपं वेदाङ्गं कालस्य बोधकं भवति । तस्मात् वेदोपवेदेषु ये केचन कालसम्बद्धाः विषयाः वर्णिताः, तस्य अवबोधार्थं ज्योतिषशास्त्रस्य साहाय्यम् आवश्यकं भवति । ज्योतिषशास्त्रेण विना कालावयवानां सम्यक् रूपेण ज्ञानं भवितुं नार्हति ।

ऋग्वेदस्य उपवेदरूपेण निर्धारितः आयुर्वेदः प्राणिनाम् आयुषः विषये ज्ञानं प्रापयति । आयुर्वेदशब्दस्य व्युत्पत्तिः "आयुः अनेन विन्दति अथवा आयुः अनेन वेत्ति इति आयुर्वेदः" इत्येव स्पष्टयति यत्, यस्य उपवेदस्य अध्ययनेन आयुषः विषये ज्ञानं लभ्यते सः आयुर्वेदः उच्यते । सुश्रुतसंहितायाम् आयुर्वेदस्य समाना व्युत्पत्तिः अनेन प्रकारेण उक्ता अस्ति **"आयुरस्मिन् विद्यते, अनेन वाऽऽयुर्विन्दति इत्यायुर्वेदः ।" (सु.सं.सू.-१/१५) ।** चरकसंहितायां तु आयुर्वेदस्य परिभाषासन्दर्भे उक्तम् अस्ति यत् 'यत्र हितस्य अहितस्य सुखकारकस्य दुःखकारकस्य च आयुषः अर्थात् जीवनस्य विषये तथा च आयुषः मानस्य विषये वर्णनं लभ्यते सः आयुर्वेदः उच्यते' ।[1]

1. हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् । मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ॥ (च.सं.सू.-१/४१)

आयुर्वेदे सुखकरस्य हितकरस्य च आयुषः अर्थात् जीवनस्य परिपालनार्थं विभिन्नाः नियमाः अपि दत्ताः सन्ति । प्रातः जागरणात् आरभ्य कदा कस्य आहारस्य विहारस्य च सेवनं करणीयम् इत्यादयः विषयाः आयुर्वेदे उपदिष्टाः सन्ति । एवंविधेषु आयुर्वेदोपदेशेषु अपेक्षानुसारं यत्र तत्र कालस्य एवञ्च कालावयवानाम् अपि वर्णनं कृतम् अस्ति । तेषां कालावयवानां स्पष्टं ज्ञानं तु ज्योतिषशास्त्रस्य साहाय्येन एव भवितुम् अर्हति, यतो हि कालज्ञानं तु ज्योतिषीयः विषयः अस्ति । वेदाङ्गज्योतिषस्य प्रस्तावनायाम् एव वर्णितम् अस्ति यत् – **कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः । ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः ॥**[2] आर्षज्योतिषग्रन्थे सूर्यसिद्धान्ते अपि वर्णनं लभ्यते यत् – भगवान् सूर्यः कालज्ञानस्य आधारभूतं ग्रहचरित्रम् अर्थात् ज्योतिषशास्त्रं स्वांशेन पुरुषेण मयासुरं बोधितवान् इति ।[3]

ज्योतिषशास्त्रं वस्तुतः ज्योतिषाम् अर्थात् ग्रह-नक्षत्रादीनां खगोलीयपिण्डानां गति-स्थित्यादीनां बोधकं शास्त्रम् अस्ति । यतो हि कालस्य गणनानिमित्तम् एतेषां ग्रहादीनां पिण्डानां गतिः एव आधारत्वेन स्वीक्रियते । अतः ग्रहगणितसम्बद्धं ज्योतिषशास्त्रम् एव कालबोधकशास्त्ररूपेण अङ्गीकृम् अस्ति । यच्च सूर्यसिद्धान्तस्य मध्यमाधिकारस्य पञ्चमे श्लोके सूर्य-मयासुरसंवादेन स्पष्टीभवति ।

**कालशब्दः**

कालशब्दस्य सामान्यव्युत्पत्तिः **'कलयति इति कालः'** भवति । शब्दकल्पद्रुमे तु **"कलयति आयुः इति कालः"** । कलसङ्ख्याने धातोः कालशब्दः निष्पद्यते । दर्शनशास्त्रे कालः एकः अखण्डश्च उक्तः अस्ति । ज्योतिषशास्त्रे गणनासौकर्यदृष्ट्या कालस्य अवयवाः विभाजिताः सन्ति । कालस्य परिभाषासहितानां कालावयवानां वर्णनं सूर्यसिद्धान्तस्य मध्यमाधिकारे दशमश्लोकतः चतुर्विंशतिश्लोकपर्यन्तं (सू.सि.म.-१०-२४) कृतम् अस्ति, एवमेव सूर्यसिद्धान्तस्य अन्तिमः कालमानाधिकारः कालगणनाविषयकः एव अस्ति । तत्र त्रुट्यादेः अतिसूक्ष्मावयवात् आरभ्य कल्पेति बृहत्तमावयवपर्यन्तं कालमानानि वर्गीकृतानि सन्ति । आयुर्वेदे कालस्य, कालावयवानां च वर्णनं बहुत्र लभ्यते ।

**आयुर्वेदे कालशब्दस्य तथा च कालावयवसम्बद्धानां शब्दानां प्रयोगः**

यतो हि आयुर्वेदे कालविषयाणां वर्णनं लभ्यते, अतः एव आयुर्वेदस्य पूर्वाचार्याः स्वकीयेषु आयुर्वदोपदेशेषु यथावसरं कालविषयान् अपि उपदिष्टवन्तः । उदाहरणार्थं बृहत्त्रय्याम् उपदिष्टानां कालविषयिणीनां शब्दावलीनाम् उपस्थापनम् अत्र क्रियते ।

**सुश्रुतसंहितायां कालसम्बद्धानां शब्दानां प्रयोगः –**

सुश्रुतसंहितायाः सूत्रस्थानस्य प्रथमे अध्याये वर्णितम् अस्ति यत् वायुः आतपः छाया प्रकाशः अन्धकारः शीतोष्णादयः च एते भावाः कालकृताः भवन्ति । एवञ्च 'अहोरात्रः, पक्षः, मासः, ऋतुः, अयनम्, संवत्सरः' इत्यादयः कालावयवाः भवन्ति इति ।[4]

सुश्रुतसंहितायाः सूत्रस्थानस्य षष्ठे अध्याये कालस्य परिभाषा कालावयवाः च वर्णिताः सन्ति । तत्र **निमेषकालतः आरभ्य मुहूर्तः अहोरात्रः, पक्षः, मासः, ऋतुः, अयनम्, संवत्सरः, युगः इति एतेषां प्रविभागाणां वर्गीकरणं कृतं विद्यते**

---

2. वेदाङ्गज्योतिषम्, श्लो.-२

3 . तोषितस्तपसा तेन प्रीतस्तस्मै वरार्थिने । ग्रहाणां चरितं प्रादान्मयाय सविता स्वयम् ।
विदितस्ते मया भावस्तोषितस्पसा ह्यहम् । दद्यां कालाश्रयं ज्ञानं ग्रहाणां चरितं महत् । (सू.सि.म.-४,५)

4. सु.सं.सू.-१/३३

।[5] यद्यपि तत्र सूक्ष्ममानत्वेन निमेषः प्रदतः अस्ति, यश्च अक्ष्णोः निमेषोन्मेषत्वेन ज्ञायते। तत्र अहोरात्र-पक्ष-मासादीनां कालमानानां मूलः आधारः न प्रदत्तः, एषः विषयः तु ज्योतिषशास्त्रस्य अध्ययनेन एव ज्ञायते।

**अष्टाङ्गहृदये कालशब्दस्य एवञ्च कालावयव-वाचिनां शब्दानां प्रयोगः**

अष्टाङ्गहृदये विभिन्नेषु स्थलेषु, प्रमुखरूपेण अ.हृ.सू.-५/४४, अ.हृ.सू.-७/६१, अ.हृ.सू.-७/६५, अ.हृ.सू.-१२/२६-२८, अ.हृ.सू.-१२/३८, अ.हृ.सू.-१२/६७, अ.हृ.सू.-२३/१९, अ.हृ.क.-६/५ इत्येतेषु स्थानेषु कालशब्दस्य प्रयोगः दृश्यते। अ.हृ.सू.-५/४४ इत्यत्र यान्त्रिकः इक्षुरसः किञ्चित् कालस्थापनेन विकृतः भवति इति वर्णितम् अस्ति। अ.हृ.सू.-७/६१ तथा च अ.हृ.सू.-७/६५ इत्यत्र अकाले अर्थात् अनुचिते काले शयनस्य दुष्प्रभावाणां वर्णनपुरस्सरम् अकालशयनस्य निषेधः कृतः अस्ति। तत्रैव शयनस्य उचितः कालः अपि निर्दिष्टः वर्तते। यः जनः सुखमयं जीवनम् इच्छति तेन शयनार्थम् उचितकालस्य ज्ञानम् आवश्यकं भवति। अ.हृ.सू.-१२/२६-२८ इत्यत्र वर्णितम् अस्ति यत् कालस्य प्रभावात् शरीरे दोषाणां चयः प्रकोपः शमः च भवति इति। तत्र वात-पित्त-कफानां दोषाणां वृद्धेः प्रकोपस्य शमनस्य च कालः अपि सूचितः वर्तते। अनेन एषः विषयः अपि ज्ञातुं शक्यते यत् दोषोत्पादकाः रोगाः अपि कालाधीनाः भवन्ति। कस्मिन् काले कस्य दोषस्य प्रकोपेण कीदृशाः विकाराः भवितुम् अर्हन्ति इति विज्ञाय तस्य निवारणार्थम् उपायः कर्तुं शक्यते। तदर्थं कालस्य ज्ञानम् आवश्यकं भवति। तस्मात् एव अष्टाङ्गहृदयस्य सूत्रस्थानस्य चतुर्थे अध्याये (अ.हृ.सू.-४/२६-२७) वर्णितम् अस्ति यत् – दोषाणां संशोधनपूर्वकं सिद्धरसायनादीनां प्रयोगान् कालवित् वैद्यः कर्तुम् अर्हति इति। यद्यपि अस्मिन् सन्दर्भे **'कालवित्'** इति पदं कालेन सहैव आतुरस्य सात्म्य-असात्म्य-सत्त्व-प्रकृतीनां ज्ञातृत्वेन अपि स्वीकृतम् अस्ति। एवञ्चेत् वैद्येन आयुर्वेदेन सह कालबोधकस्य ज्योतिषशास्त्रस्य अपि अपेक्षितं ज्ञानं प्राप्तव्यम्।

**आयुर्वेदे औषधसेवनार्थम् योग्यस्य कालस्य निर्देशः कृतः वर्तते** –

आयुर्वेदे औषधसेवनार्थम् अपि उचितः कालः निर्धारितः अस्ति। उदाहरणार्थम् अष्टाङ्गहृदये **(अ.हृ.सू.-२०/ १४-१५)** नस्यौषधस्य सेवनार्थम् उचितस्य कालस्य वर्णनं कृतम् अस्ति। तथैव **अ.हृ.सू.-२३/१८-१९** इत्यत्र अञ्जनार्थम् उचितः कालः निर्दिष्टः वर्तते। अष्टाङ्गहृदयस्य कल्पसिद्धिस्थाने औषधद्रव्याणाम् उपयोगार्थं योग्यकालस्य वर्णनं कृतम् अस्ति। **अ.हृ.क.-६/५,** इत्यत्र वर्णितम् अस्ति यत् उपयोगार्थम् औषधद्रव्याणां चयनं योग्यकाले करणीयम् इति। अत्र कालशब्दस्य व्याख्याने सर्वाङ्गसुन्दरव्याख्याकारः अरुणदत्तः उदाहरणरूपेण निर्दिशति यत् – **गुडादीन् वर्जयित्वा परमौषधमनतिक्रान्तवत्सरं कल्पयेत्। गुडादींस्तु अतिक्रान्तवत्सरान् कल्पयेत्।[6] इति।**

**आयुर्वेदे दिन-रात्रि-शब्दयोः प्रयोगः** –

दैनिकजीवने व्यवहारार्थं दिनस्य रात्रेः च भेदज्ञानम् अपेक्षितं भवति। आयुर्वेदे दिन-रात्र्योः विषये प्रायेण सर्वस्मिन् सन्दर्भे निर्दिष्टं वर्तते। दिनस्य रात्रेः च परिभाषा ज्योतिषशास्त्रस्य आधारेण निर्धारिता अस्ति। दिनस्य रात्रेः च परिभाषासन्दर्भे उक्तम् अस्ति यत् – **दिनं दिनेशस्य यतोऽत्र दर्शने तमी तमोहन्तुरदर्शने सति।**[7] अर्थात् सूर्यस्य उदयात् आरभ्य यावत् पर्यन्तं सूर्यस्य दर्शनं भवति (सूर्यास्तपर्यन्तम् इति) तावत् 'दिनम्' इति कथ्यते। तथैव सूर्यास्तस्य अनन्तरं तमी अर्थात् रात्रिः भवति। 'दिनं दिवा दिवसः अहः' इत्यादीनि पदानि दिनस्य पर्यायत्वेन उच्यन्ते, तथैव 'रजनी शर्वरी निशा नक्तं तमी' इत्यादीनि पदानि रात्रेः

5. सु.सू.-६/३-७

6. अ.हृ.क.-६/५

7. सिद्धान्तशिरोमणिः / गोलाध्यायः / ८/१०

पर्यायत्वेन उच्यन्ते। आयुर्वेदस्य बृहत्त्रय्यां दिनशब्दस्य पर्यायत्वेन 'दिनम् अहः दिवा दिवसः' इत्येतेषां पदानां प्रयोगः दृश्यते, एवमेव रात्र्यर्थे 'रात्रिः रजनी निशा नक्तम्' इत्येतेषां पदानां प्रयोगः लभ्यते।

**अष्टाङ्गहृदये दिनार्थकानां शब्दानां प्रयोगः –**

अष्टाङ्गहृदये बहुत्र दिनार्थकानां दिन-अहन्-दिवाशब्दानां प्रयोगः लभ्यते। तत्रापि दिवाशब्दस्य प्रयोगः प्रायेण अधिकः तथा च दिनशब्दस्य प्रयोगः न्यूनः दृश्यते, अहन्-शब्दस्य प्रयोगः प्रायेण समस्तपदेषु एव दृश्यते, यथा – अहोरात्रः, त्र्यहः, द्व्यहः इत्यादिः। अत्र कानिचन उदाहरणानि लिख्यन्ते, यथा –

**अष्टाङ्गहृदये दिनशब्दस्य प्रयोगः** – अ.हृ.सू.-२/ ४७, अ.हृ.नि.-१/११, अ.हृ.चि.-१५/११६, अ.हृ.उ.-३९ / १८ इत्यादिषु स्थानेषु दिनशब्दस्य प्रयोगः लभ्यते।

**अष्टाङ्गहृदये दिवाशब्दस्य प्रयोगः** – अ.हृ.सू.-२/३८, अ.हृ.सू.-७/५५, अ.हृ.चि.-१०/९०, अ.हृ.चि.-१५ १२६, अ.हृ.उ.-२५/२१ इत्यादिषु स्थानेषु दिवाशब्दस्य प्रयोगः दृश्यते।

**अष्टाङ्गहृदये अहन्-शब्दस्य प्रयोगः** – अ.हृ.सू.-१६/३६, अ.हृ.चि.-१५/११६, अ.हृ.चि.-८/३७, अ.हृ.क.-३०/२८ इत्यादिषु स्थानेषु अहःशब्दस्य प्रयोगः दृश्यते।

**अष्टाङ्गहृदये रात्र्यर्थकानां शब्दानां प्रयोगः**

अष्टाङ्गहृदये रात्र्यर्थकानां रात्रि-नक्त-निशाशब्दानां प्रयोगः लभ्यते। यथा – अ.हृ.सू.-२/३७, अ.हृ.सू.-२/ ४७, अ.हृ.नि.-१/११ इत्यादिषु स्थानेषु रात्र्यर्थकस्य नक्तशब्दस्य प्रयोगः दृश्यते। अ.हृ.सू.-७/५५, अ.हृ.चि.-११.६०, अ.हृ.चि.-१५.९२, अ.हृ.चि.-१९.३०, अ.हृ.उ.-२५/२१, अ.हृ.उ.-१६/६५, अ.हृ.उ.-२५/२१, इत्यादिषु स्थानेषु रात्रिशब्दस्य प्रयोगः स्वतन्त्रतया अथवा समस्तरूपेण (अहोरात्र-त्रिरात्र-षड्रात्र-सप्तरात्र-इत्यादिरूपेण अपि) दृश्यते। अ.हृ.नि.-४/१४, अ.हृ.उ.-५/१७, अ.हृ.उ.१३/८४, अ.हृ.उ.-३९/१०३, अ.हृ.उ.-४०/४५ इत्येतेषु स्थानेषु निशाशब्दस्य प्रयोगः रात्र्यर्थे कृतः अस्ति। अन्यत्र तु हरिद्रार्थे अपि निशाशब्दस्य प्रयोगः कृतः अस्ति।

**चरकसंहितायां दिनार्थकानां शब्दानां प्रयोगः –**

चरकसंहितायां दिन-दिवाशब्दयोः प्रयोगः दिनार्थे कृतः अस्ति। यथा – च.सं.सि.-५/८० इत्यत्र दिनशब्दस्य प्रयोगः कृतः अस्ति। च.सं.सि.-१/२२-२३, च.सं.सि.-१/५४, च.सं.सि.-१२/११, च.सं.इ.-२/८, च.सं.इ.-५/४४ इत्यादिषु अधिकेषु स्थानेषु दिवा-शब्दस्य प्रयोगः दृश्यते। च.सं.चि.-१/३/४३ इति एकत्र एव अहोरात्रिकम् इति पदे दिनवाचकस्य अहन्-शब्दस्य समस्तं रूपं दृश्यते।

**चरकसंहितायां रात्र्यर्थकयोः रात्रि-निशाशब्दयोः प्रयोगः –**

चरकसंहितायां रात्रिशब्दस्य प्रयोगः एव प्रायेण कृतः अस्ति। उदाहरणार्थं च.सं.चि.-२/१/४६, च.सं.चि.२/३/१३, च.सं.क.-१/१४ इत्यादिषु स्थानेषु रात्र्यर्थे रात्रिशब्दः प्रयुक्तः अस्ति। च.सं.चि.२/१/४७ इत्यत्र रात्र्यर्थे निशाशब्दस्य प्रयोगः कृतः वर्तते।

**विशेषः** – निशा-रजनीत्यादयः रात्रिवाचकाः शब्दाः हरिद्रायाः कृते अपि प्रयुज्यन्ते। अष्टाङ्गहृदये हरिद्रार्थे निशा-शब्दस्य प्रयोगः आधिक्येन कृतः अस्ति, तथैव चरकसंहितायां रात्र्यर्थकस्य रजनी-शब्दस्य प्रयोगः हरिद्रार्थे एव कृतः वर्तते।

**सुश्रुतसंहितायां दिनार्थकशब्दानां प्रयोगः –**

सुश्रुतसंहितायां दिनार्थकस्य दिवाशब्दस्य प्रयोगः प्रायेण कृतः अस्ति। उदाहरणार्थं – सु.सं.सू.-१४/३२-३३, सु.सं.सू.-१६/१६, सु.सं.सू.-१८/१३, सु.सं.सू.-१९/९,१०,१२, सु.सं.शा.-२/२५, सु.सं.शा.-४/३८,३९,४१, सु.सं.क.-४/३१, सु.सं.क.-५/५३, सु.सं.क.-६/३१, सु.स.उ-७/३६, सु.स.उ-७/३८,४०,४१ इत्यादिषु स्थानेषु दिवाशब्दस्य प्रयोगः लभ्यते। सु.सं.सू.-४६/४६९, सु.सं.सू.-४६/४७०, सु.सं.शा.-२/२५, सु.स.उ-७/४०, इत्यादिषु स्थानेषु दिवस-शब्दस्य प्रयोगः अपि दिनार्थे कृतः अस्ति।

**सुश्रुतसंहितायां रात्र्यर्थकानां शब्दानां प्रयोगः –**

सुश्रुतसंहितायां रात्र्यर्थे रात्रि-रजनी-निट्-शब्दानां प्रयोगः दृश्यते। सु.सं.शा.-३/१६, सु.सं.शा.-४/३८, सु.सं.शा.-४/३९, सु.सं.शा.-४/४०, सु.सं.शा.-४/४१ इत्यादिषु स्थानेषु रात्रिशब्दस्य प्रयोगः दृश्यते। सु.सं.सू.-४६/४७०, सु.सं.क.-४/३१ इत्यत्र रजनीशब्दस्य प्रयोगः रात्र्यर्थे कृतः अस्ति। सुश्रुतसंहितायाः चिकित्सास्थाने एवञ्च उत्तरस्थाने रजनीशब्दः हरिद्रायाः अर्थे प्रयुक्तः अस्ति। सु.स.उ.-७/३६ इत्यत्र निट्-शब्दः रात्र्यर्थे प्रयुक्तः अस्ति।

**अहोरात्र-दिवसादयः शब्दाः सावनकालमानं सूचयन्ति –**

यत्र दिनार्थकानां रात्र्यर्थकानां च शब्दानां प्रयोगः द्विगुसमासेन विना अथवा सङ्ख्यासूचकेन पदेन विना कृतः, अथवा दिनवाचकः शब्दः रात्रिवाचकेन शब्देन सह समस्तः अपि न स्यात्, यथा – **दिने** शिरःशूलं **दिनवृद्ध्या** विवर्धते।[8] **रात्रौ** जागरणं रूक्षं स्निग्धं प्रस्वपनं **दिवा**।[9] **नक्तं** सेवेत न द्रुमम्।[10] सर्वर्तुषु **दिवास्वापः** प्रतिषिद्धोऽन्यत्र ग्रीष्मात्।[11] इत्यादिषु स्थानेषु दिनार्थकाः रात्र्यर्थकाः च शब्दाः दिनस्य रात्रेः च भेदसूचकाः भवन्ति। परन्तु यत्र दिनानां समूहस्य गणना निर्दिष्टा अस्ति, यथा – **तृतीयेऽह्नि** चतुर्थे वा **यावदाषोडशं दिनम्**।[12] अथवा दिन-रात्र्यर्थकानां शब्दानां द्विगुसमासः कृतः अस्ति, यथा – ऋत्वोरन्त्यादि**सप्ताहा**वृतुसंधिरिति स्मृतः।[13] स्निग्ध**स्त्र्यहं** स्थितः कुर्याद्विरेकं वमनं पुनः।[14] अथवा दिन-रात्र्यर्थकयोः शब्दयोः द्वन्द्वसमासः कृतः अस्ति, यथा – **नक्तन्दिनानि** मे यान्ति कथम्भूतस्य संप्रति।[15] कृत्वा सम**महोरात्रं** तेषु भुञ्जीत भोजनम्।[16] इत्यादिषु सन्दर्भेषु दिन-रात्र्यर्थकाः शब्दाः सावननामकं कालमानं बोधयन्ति।

**ज्योतिषीयं सावनमानम् –**

ज्योतिषशास्त्रे नवविधानि कालमानानि वर्गीकृतानि सन्ति। ब्राह्ममानं, दिव्यमानं, पैत्र्यमानं, प्राजापत्यमानं, बार्हस्पत्यमानं, सौरमानं, सावनमानं, चान्द्रमानं, नाक्षत्रमानं च इति।[17] तत्र एकस्मात् सूर्योदयात् आरभ्य अग्रिमसूर्योदयपर्यन्तम्

8. च.सं.सि.-५/८०
9. अ.हृ.सू.-७/५५
10. अ.हृ.सू.-२/३७
11. सु.सं.शा.-४/३८
12. अ.हृ.चि.-१५/११६
13. अ.हृ.सू.-३/५८
14. अ.हृ.सू.-१६/३६
15. अ.हृ.सू.-२/ ४७
16. सु.सं.सू.-४६/४७१
17. सू.सि.-१४/१

एकं सावनदिनं भवति।[18] एकस्मिन् सावनदिने दिन-रात्र्योः भागः युक्तः भवति। चिकित्साकार्येषु दिनानां गणनार्थं सावनमानस्य प्रयोगः क्रियते इति ज्योतिषशास्त्रे अपि निर्दिष्टं वर्तते।[19]

**मुहूर्तमानम्** –

'मुहूर्तः' इति काल-गणनानिमित्तं किञ्चन मानम् अस्ति। घटीद्वयात्मकः कालः एकः मुहूर्तः कथ्यते। सः कालः तु आधुनिक मानेन ४८ मिनिट्स इत्यनेन तुल्यः भवति। एकस्मिन् षष्टिघटिकात्मके अहोरात्रे (षष्टिघटिकात्मकः अहोरात्रः इति गणना नाक्षत्रमानेन क्रियते[20]) आहत्य त्रिंशत् मुहूर्ताः भवन्ति। दिनमानस्य पञ्चदशविभागान् कृत्वा दिनस्य एकमुहूर्तस्य मानं तथैव रात्रिमानस्य पञ्चदशविभागान् कृत्वा रात्रेः एकमुहूर्तस्य मानं ज्ञातुं शक्यते। ज्योतिषशास्त्रे व्यवहारदृष्ट्या दिनस्य रात्रेः च पृथक् पृथक् पञ्चदशमुहूर्तानां नामानि दत्तानि सन्ति।

**आयुर्वेदे मुहूर्तनामकस्य कालभेदस्य प्रयोगः** –

आयुर्वेदे विविधानां कालमानानां प्रयोगः कृतः अस्ति, तस्मिन् क्रमे आवश्यकतानुसारं मुहूर्तनामकस्य कालप्रमाणस्य अपि प्रयोगः लभ्यते। आयुर्वेदे आवश्यकतानुसारं मुहूर्तशब्देन त्रिधा अर्थः स्वीकृतः अस्ति। यत्र मुहूर्तशब्दः योग्य-प्रशस्त-शुभादिभिः विशेषणैः विना उक्तः तत्र कश्चन घटिकाद्वयात्मकः (४८ मिनिट्स) कालः अभीष्टः भवति। यत्र मुहूर्तस्य नाम निर्दिष्टम् अस्ति, यथा ब्राह्ममुहूर्तः नैर्ऋतमुहूर्तः इत्यादिः, तत्र तत्संज्ञकः निश्चितः मुहूर्तः अभीष्टः भवति, परन्तु यत्र शुभस्य अथवा प्रशस्तस्य मुहूर्तस्य विषये निर्देशः दत्तः, तत्र तु ज्योतिषीया पञ्चाङ्गशुद्धिः अभीष्टा भवति। यथा –

**अष्टाङ्गहृदये मुहूर्तशब्दस्य प्रयोगः**

अष्टाङ्गहृदये अ.हृ.सू.-२/१, अ.हृ.सू.-१८/१८, अ.हृ.चि.-२२/३७, अ.हृ.उ.-३६/३२ इत्यादिषु स्थानेषु मुहूर्तशब्दस्य प्रयोगः दृश्यते। अ.हृ.सू.-२/१ इत्यत्र ब्राह्मसंज्ञकस्य मुहूर्तस्य वर्णनं कृतम् अस्ति। ब्राह्म-मुहूर्तः रात्रेः चतुर्दशः मुहूर्तः भवति, तस्मिन् काले एव स्वस्थेन जागरणं करणीयम् इति निर्देशः दत्तः वर्तते। अ.हृ.सू.-१८/१८ इत्यत्र वमनकर्मनिमित्तं वमनौषधं पीत्वा एकमुहूर्तपर्यन्तं (४८ मिनिट्स) वमनैकचित्तेन उपवेष्टव्यम् इति निर्देशः दत्तः अस्ति। अ.हृ.चि.-२२/३७ इत्यत्र वातकफोत्तरस्य वातरक्तस्य चिकित्सासन्दर्भे औषधं लेपयित्वा एकमुहूर्तानन्तरं सुक्तादिभिः सेचनार्थं निर्देशः दत्तः अस्ति। अ.हृ.उ.-३६/३२ इत्यत्र तु निर्दिष्टं वर्तते यत् यदि कश्चन जनः नैर्ऋत्याख्ये मुहूर्ते सर्पेण दष्टः, तर्हि सः सर्पविशात् निश्चयेन मरणं प्राप्नोति। तस्य चिकित्सा सफला न भवति इति।

**चरकसंहितायां मुहूर्तशब्दस्य प्रयोगः** –

च.सं.चि.-१/१/२१, च.सं.चि.-१/२/११, च.सं.सि.-३/१३ इत्यादिषु स्थानेषु मुहूर्तशब्दस्य प्रयोगः प्राप्यते। चरकसंहितायां तु मुहूर्तशब्देन उचितः अथवा शुभः कालः अभीष्टः भवति। यथा – च.सं.चि./१/२१ इत्यत्र रसायनसेवनार्थं शुभे मुहूर्ते रसायनकुटीरे प्रवेशः करणीयः इति निर्दिष्टं वर्तते। औषधार्थं नागबलायाः मूलस्य उत्पाटनसन्दर्भे उक्तम् अस्ति यत् – चले **सुमूहूर्ते** नागबलामूलान्युद्धरेत् (च.सं.चि.-१/२/११) इति। च.सं.सि.-३/१३ इत्यत्र निर्दिष्टम् अस्ति यत् आस्थापनवस्तेः प्रयोगः प्रशस्ते मुहूर्ते करणीयः इति।

18. सू.सि.-१४/१८

19. सि.शि. / गणिताध्यायः / मध्यमाधिकारः / ३१

20. सू.सि.-१/१२

**सुश्रुतसंहितायां मुहूर्तशब्दस्य प्रयोगः –**

सुश्रुतसंहितायां मुहूर्तशब्दः घटिकाद्वयात्मकस्य (४८मिनिट्स) कालखण्डस्य कृते तथा च योग्यस्य कालस्य कृते अपि प्रयुक्तः अस्ति । उदाहरणार्थं – सुं.सू.-१३/१९, सु.स.-४५/८ इत्यनयोः स्थानयोः उक्तः मुहूर्तशब्दः कस्यचित् घटिकाद्वयात्मकस्य कालखण्डस्य बोधकः अस्ति । तथैव सु.सं.सू.-२/४, सु.सं.सू.-५/७ इत्यनयोः स्थानयोः मुहूर्तशब्दस्य प्रयोगः शुभकालस्य बोधनार्थं कृतः वर्तते ।

**आयुर्वेदे ज्योतिषीय-पञ्चाङ्गस्य शब्दावलीनां प्रयोगः –**

ज्योतिषशास्त्रे कस्यचित् कार्यस्य निमित्तं शुभकालस्य विनिश्चयार्थं विशेषरूपेण **"तिथिः, वारः, नक्षत्रं, योगः, करणम्"** इति एतानि पञ्चाङ्गानि निर्दिष्टानि सन्ति । यस्मिन् काले अभीष्टकार्यस्य कृते एतानि प्रशस्तानि भवन्ति, तस्मिन् काले अभीष्टकार्यस्य मुहूर्तम् अस्ति इति निश्चयः भवति । ज्योतिषीयपरम्परायाम् एषः पञ्चाङ्गशुद्धिः इत्यपि कथ्यते । आयुर्वेदे तिथि-वार-नक्षत्रादीनां शुद्धेः विषयाः अनेकेषु स्थलेषु निर्दिष्टाः सन्ति । यथा –

**अथोदगयने शुक्ले तिथिनक्षत्रपूजिते । मुहूर्तकरणोपेते** प्रशस्ते कृतवापनः ।।[21]

**प्रशस्तनक्षत्रमुहूर्तयोगे** जीर्णान्निमेकाग्रमुपक्रमेत ।[22] उपनयनीयं तु ब्राह्मणं प्रशस्तेषु **तिथिकरणमुहूर्तनक्षत्रेषु** .......।[23]

ततः प्रशस्तेषु **तिथिकरणमुहूर्तनक्षत्रेषु** दध्यक्षतान्नपानरत्नैरग्निं विप्रान् भिषजश्चार्चयित्वा ....... ।[24]

रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येते तौ **षष्ठे मासि सप्तमे वा शुक्लपक्षे प्रशस्तेषु तिथिकरणमुहूर्तनक्षत्रेषु .... ।**[25]

**इत्यादिः ।**

अष्टाङ्गहृदये, अ.हृ.उ.-३६/३१-३२ इत्यत्र निर्दिष्टं वर्तते यत् **अष्टम्यां नवम्यां च तिथौ सन्ध्याकाले मध्याह्ने एवञ्च भरणी-कृत्तिका-मघा-आश्लेषा-विशाखा-मूलनक्षत्रेषु** यदि कश्चन सर्पेण दंशितः तर्हि, सः मरणम् एव प्राप्नोति । तस्य चिकित्सा सफला न भवति इति ।

**मासः ऋतुः अयनं वत्सरः इत्येतानि कालमानानि**

**मासः** – ज्योतिषशास्त्रे मासशब्देन अभिप्रायः त्रिंशत्-दिनात्मकः कालः भवति । सः च मासः प्रत्येकं कालमानस्य कृते पृथक् पृथक् भवति । उदाहरणार्थं सूर्योदयात् अग्रिमसूर्योदयपर्यन्तम् अहोरात्रगणया त्रिंशता अहोरात्रेण एकः सावनमासः । त्रिशत्-तिथीनाम् एकः चान्द्रमासः । नाक्षत्रदिनानां त्रिंशत्-सङ्ख्यया एकः नाक्षत्रमासः । त्रिंशदंशात्मकस्य राशेः सूर्य-सङ्क्रान्त्याः एकः सौरमासः इत्यादिः ।[26] तथापि लोके मासस्य गणना चान्द्रमासक्रमेण एव भवति इति भास्कराचार्यः सिद्धान्तशिरोमणौ निर्दिशति – **मासास्तथा च तिथयस्तुहिनांशु मानात् ।**[27]

**द्वादश चान्द्रमासानां गणना अनेन प्रकारेण भवति –**

**१. चैत्रः, २. वैशाखः, ३. ज्येष्ठः, ४., आषाढः, ५. श्रावणः, ६. भाद्रपद्,**

21. च.सं.चि./१/२१
22. च.सं.सि.-३/१३
23. सु.सं.सू.-२/४
24. सु.सं.सू.-५/७
25. सु.सं.सू.-१६/३
26. सू.सि.-१/१२-१३
27. सि.शि. / गणिताध्यायः / मध्यमाधिकारः / ३१

**७. आश्विन्, ८. कार्तिकः, ९. मार्गशीर्षः, १०. पौषः, ११. माघः, १२. फाल्गुनः । इति ।**

**ऋतुः अयनं वत्सरः च** – ऋतु-अयन-वत्सराणां गणना सौरमानेन भवति ।[28] सूर्यस्य एकराशिसङ्क्रमणात् अपरराशिसङ्क्रमणं यावत् एकः सौरमासः भवति । तथैव द्वयोः राश्योः सङ्क्रमणेन अर्थात् सौरमासद्वयेन एकः ऋतुः भवति । तत्र मकरराशेः आरभ्यमिथुनराशिपर्यन्तं सूर्यस्य उत्तरायणकालः, तथा च कर्कराशेः आरभ्य धनुराशिपर्यन्तं सूर्यस्य दक्षिणायनकालः भवति ।[29] अनेन क्रमेण एव मकरादेः आरभ्य द्वयोः द्वयोः राश्योः क्रमशः शिशिरादयः षट् ऋतवः भवन्ति ।[30] यथा – मकर-कुम्भयोः शिशिरः, मीन-मेषयोः वसन्तः, वृष-मिथुनयोः ग्रीष्मः, कर्क-सिंहयोः वर्षा, कन्या-तुलयोः शरद्, वृश्चिक-धन्वोः हेमन्तः इति । मेषराशेः आरभ्य सौरमासानां गणना भवति । द्वादश-सौरमासानाम् एकः सौरवर्षः भवति ।[31]

## आयुर्वेदे मास-ऋतु-अयन-वत्सराणां शब्दानां प्रयोगः –

आयुर्वेदे ऋतुचर्या इति कश्चन प्रधानः विषयः अस्ति । कस्मिन् ऋतौ कीदृशः आहारः विहारः च सेवनीयः इति आयुर्वेदस्य प्रधानः उपदेशः वर्तते । आयुर्वेदीय-चिकित्सायाम् अपि ऋतूनां महत्त्वम् अस्ति । तस्मात् आयुर्वेदस्य प्रायेण प्रत्येकस्मिन् ग्रन्थे ऋतुचर्यायाः वर्णनं लभ्यते एव । उदाहरणार्थं **चरकसंहितायाः सूत्रस्थानस्य षष्ठे अध्याये, सुश्रुतसंहितायाः सूत्रस्थानस्य षष्ठे अध्याये, तथा च अष्टाङ्गहृदयस्य सूत्रस्थानस्य तृतीये अध्याये** ऋतूनां गणना, ऋतूनां लक्षणम् एवञ्च प्रत्येकस्मिन् ऋतौ सेवनीयानां वर्जनीयानां च आहार-विहाराणां वर्णनं विस्तरेण निरूपितं वर्तते । एतेषु एव स्थानेषु उत्तरायण-दक्षिणायनयोः अपि वर्णनं लभ्यते । तत्र उत्तरायणकालः आदानकालत्वेन तथा च दक्षिणायनकालः विसर्गकालत्वेन परिभाषितः वर्तते ।[32] त्रिदोषाणां निरूपणप्रसङ्गे अपि दोषाणां सञ्चयः प्रकोपः अथवा प्रशमनं कस्मिन् ऋतौ भवति इति वर्णितम् अस्ति ।[33] चरकसंहितायां तपसः अर्थात् माघमासात् अथवा तपस्यात् इत्युक्ते फाल्गुनमासात् आरभ्य एकसंवत्सर-पर्यन्तं नागबलारसायनस्य सेवनेन शतं वर्षाणि यावत् स्वस्थं जीवनं भवति इति उपदिष्टं वर्तते ।[34] अत्र तपस्-तपस्यौ क्रमशः माघ-फालगुनयोः मासयोः वैदिक-नामनी स्तः । सुश्रुतसंहितायां कर्णवेधसंस्कारस्य वर्णनसन्दर्भे उक्तम् अस्ति यत् जन्मकालतः षष्ठे अथवा सप्तमे मासे कर्णवेधसंस्कारः करणीयः इति ।[35] अन्तरीक्षजलविषये अष्टाङ्गहृदये निर्दिष्टम् अस्ति यत् –आश्विनमासे वृष्टम् आन्तरीक्षजलम् एव पातव्यम्, आश्विनमासं विहाय अन्यमासेषु वृष्टं जलं न पातव्यम् इति ।[36] समानः एव विषयः सुश्रुतसंहितायाम् अपि उपदिष्टः वर्तते ।[37]

## आयुर्वेदे फलितज्योतिषसम्बद्धानां विषयाणां वर्णनम् –

फलितज्योतिषशास्त्रे तु लोके ग्रहाणां प्रभावस्य अध्ययनं क्रियते । फलितज्योतिषस्य प्रमुखतया द्वौ भागौ भवतः होरा संहिता चेति । जातकस्य अर्थात् कस्यचित् जनस्य शुभाशुभविषयाणां वर्णनं होराज्योतिषस्य अथवा जातकज्योतिषस्य प्रमुखः विषयः भवति । संहिताज्योतिषे तु ग्रहाणां भौगोलिकप्रभावस्य विवेचनं क्रियते । सु.सं.सू.-२८/६ इत्यत्र नक्षत्रजन्यायाः पीडायाः

28. सि.शि. / गणिताध्यायः / मध्यमाधिकारः / ३१
29. सू.सि.-१४/९-१०
30. सू.सि.-१४/९-१०
31. सू.सि.-१४/९-१०
32. अ.हृ.सू.-३/२
33. अ.हृ.सू.-१२/२४-२८
34. च.सं.चि.-१/२/११
35. सु.सू.-१६/३
36. अ.हृ.सू.-५/४
37. सु.सं.सू.-४५/७-८

वर्णनं, तेन होराज्योतिषीयस्य अरिष्टस्य वर्णनं च कृतम् अस्ति। अ.हृ.उ.-१/२३ इत्यत्र नक्षत्राणां देवतासम्बन्धि विवेचनं कृतम् अस्ति। जातकस्य नामकरणसंस्कारे जातक-नक्षत्रस्य देवतासम्बद्धं नाम अपि दातव्यम् इति निर्दिष्टं वर्तते।[38] ज्योतिषशास्त्रस्य भौगोलिकफलादेशसम्बद्धे संहितास्कन्धे भौगोलिकक्षेत्रोपरि ग्रहादीनां प्रभावाणां विषये विवेचनं क्रियते। तस्य अल्पं वर्णनम् आयुर्वेदे अपि दृश्यते। चरकसंहितायां सुश्रुतसंहितायां च जनपदोध्वंशस्य एकं प्रमुखकारणं ग्रह-नक्षादीनां प्रभावः अपि स्वीकृतः अस्ति।[39]

**ग्रहाः –**

ज्योतिषशास्त्रीयाध्ययनस्य प्रमुखः आधारः ग्रहाः एव। भारतीये ज्योतिषशास्त्रे 'सूर्यः चन्द्रमाः भौमः बुधः गुरुः शुक्रः शनिः राहुः केतुः' इत्येते नवग्रहाः स्वीकृताः सन्ति। तेष्वपि सूर्याचन्द्रमसौ विशिष्टग्रहरूपेण स्वीकृतौ, भौमादयः पञ्च ताराग्रहाः कथिताः। राहुः केतुः च वस्तुतः क्रान्तिवृत्त-चन्द्रविमण्डलयोः सम्पातबिन्दू भवतः, तथापि "गृह्णाति गतिविशेषान् तथा च गृह्णाति फलदातृत्वेन जीवान्" इति ग्रहः इत्येताभ्यां व्युत्पत्तिभ्याम् आधारेण, ग्रहरूपेण अङ्गीकृतौ, यतो हि राहु-केत्वाख्ययोः सम्पातयोः अपि गतिः भवति, तथा च फलितज्योतिषशास्त्रानुसारं एतयोः अपि प्रभावः प्राणिषु भवति। सूर्य-चन्द्रग्रहणयोः कारणभूतौ तु राहु-केत्वाख्यौ सम्पातौ एव भवतः।

**आयुर्वेदे ग्रहविषयकं वर्णनम् –**

चरकसंहितायां निर्दिष्टं वर्तते यत् 'ग्रहाणां गतेः कारणं वायुः भवति' इति।[40] सूर्यसिद्धान्ते अपि ग्रहाणां गतेः कारणं प्रवह-नामकः वायुः एव उक्तः वर्तते।[41] अष्टाङ्गहृदये तु पित्तदोषस्य शमनार्थं विविधैः उपक्रमैः सह चन्द्रमसः दर्शनम् अपि कश्चन उपक्रमः निर्दिष्टः वर्तते।[42] एवमेव ग्रीष्मर्तौ कालजन्यस्य तापस्य निवारणार्थं रात्रौ चन्द्रकिरणैः नक्षत्रैः च शीतलस्य माहिषक्षीरस्य पानं निर्दिष्टं वर्तते।[43]

**आयुर्वेदे शकुन-स्वप्नफलसम्बन्धि विवेचनम्, तत्र ग्रह-ग्रहणविषयकाणां शब्दानां प्रयोगः –**

आयुर्वेदे स्वप्नफलस्य विषये विस्तरेण वर्णनं विद्यते। तत्र अष्टाङ्गहृदयस्य शारीरस्थानस्य षष्ठे अध्याये, चरकसंहिताया इन्द्रियस्थानस्य षष्ठे अध्याये एवञ्च सुश्रुतसंहितायाः सूत्रस्थानस्य एकोनत्रिंशे अध्याये विविधानां शुभाशुभानां शकुनानां विषये वर्णनं कृतम् अस्ति। तत्रापि अ.हृ.शा.-६/४०-७१, च.सं.इ.-६/२६-४७, सु.सं.सू.-२९/५४-८१ इत्यत्र स्वप्नफलस्य विषये अपि विस्तरेण वर्णनं कृतम् अस्ति। च.सं.इ.-५ / ३५, अ.हृ.शा.-६/५५ इत्यत्र वर्णितम् अस्ति यत् स्वप्ने दन्तस्य चन्द्रग्रहस्य सूर्यग्रहस्य नक्षत्रस्य देवविग्रहस्य दीपस्य वा पतनम् अथवा विनाशः अशुभस्वप्नः भवति। अ.हृ.शा.-६/४८ इत्यत्र निर्दिष्टं वर्तते यत् स्वप्नो सूर्य-चन्द्रग्रहणस्य अथवा सूर्य-चन्द्रपातस्य तन्नाम राहु-केत्वोः दर्शनेन दृष्टिशक्तिनाशस्य सम्भावना भवति इति।

अनेन प्रकारेण आयुर्वेदे ज्योतिषशास्त्रीयशब्दावलीनां प्रयोगः बहुषु स्थानेषु कृतः अस्ति, यासां शब्दावलीनां ज्ञानार्थं ज्योतिषस्य अध्ययनम् अपि आवश्यकं भवति। कालमानानि, ग्रहाः, नक्षत्राणि, पातः, ग्रहगतिः, ग्रहणं तथा च प्राणिषु ग्रहाणां प्रभावः इत्येते ज्योतिषीयाः विषयाः आयुर्वेदस्य ज्ञानार्थम् अपेक्षिताः भवन्ति इति पूर्वतनैः आचार्यैः ज्ञातम्। अतः एव एते विषयाः

38. अ.हृ.उ.-१/२३

39. च.सं.वि.-३/४, सु.सं.सू.-६/१९

40. च.सं.सू. / १२ / ८

41. सू.सि.-२/३-४

42. अ.हृ.सू.-१३/६

43. अ.हृ.सू.-३/३३

यथास्थानम् आयुर्वेदग्रन्थेषु उपदिष्टाः वर्तते । आयुर्वेदस्य सम्यक् अध्ययनार्थम् अपेक्षितानां ज्योतिषीयशब्दावलीनां ज्ञानम् अपेक्षितं भवति । आयुर्वेदे यासां ज्योतिषीय-शब्दावलीनां प्रयोगः वर्तते ताः शब्दावल्यः तु प्रायेण अत्र उपस्थापिताः सन्ति ।

**सन्दर्भग्रन्थाः** –


1. त्रिपाठी ब्रह्मानन्द (व्याख्याकारः), **चरकसंहिता**, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१७
2. पराडकर हरि सदाशिवशास्त्री (परिष्कर्ता), **अष्टाङ्गहृदयम्,** श्रीमद्वाग्भटः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१७
3. शर्मा अनन्तराम (व्याख्या.), **सुश्रुतसंहिता,** चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१७
4. श्रीकपिलेश्वशास्त्री (भाष्यकारः), **सूर्यसिद्धान्तः,** चौखम्भा संस्कृत संस्थान, वाराणसी, वि.सं.-२०४४
5. शर्मा सत्यदेव (व्याख्या.), **सिद्धान्तशिरोमणिः (गणिताध्यायः**) श्रीमद्भास्कराचार्यः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१६
6. जोशी केदारदत्त (व्याख्या.), श्रीमद्भास्कराचार्यविरचितः **सिद्धान्तशिरोमणिः (गोलाध्यायः**), मोतीलाल बनारसीदास, दिल्ली, २०१०
7. Holay Prabhakar Vyankatesh (Author), **Vedic Astronomy,** लगधमुनि विरचितं **वेदाङ्गज्योतिषम्,** Shri Babasaheb Apte Samitee, Apte Bhavan, Mahal Nagpur, १९८९